## SK-301 – ऋग्वेदसूक्तानि

कालावधिः - होरा　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - 25

---

**A) अधःप्रदत्तेषु षट् प्रश्नान् अतिसंक्षेपेण समाधत्त।　　　　　　　　1x6=6**

1) पुरुषसूक्तगते प्रथममन्त्रे दशाङ्गुलम् इति यत् पदमस्ति तेन किं व्यज्यते।
2) यज्ञेन यज्ञमयजन्त देवाः इत्यत्र किमर्थं द्विवारं यज्ञपदस्य व्यवहारः।
3) पृषदाज्यम् इत्यनेन किमवगम्यते।
4) सूर्याचन्द्रमसौ कुतो जातौ।
5) स्वधाशब्दस्य किं खलु निर्वचनम्।
6) पुरुषसूक्तस्य क ऋषिः किं छन्दः का च देवता।
7) शर्मन् इति पदे केन सूत्रेण कस्या विभक्तेर्लुक् भवति।
8) अवस्तात् इति पदं कथं सिध्यति।

**B) अधोगतेषु मन्त्रभागेषु त्रयाणां प्रश्नानां व्याख्या कार्या।　　　　　　　　3x3=9**

1) किमावरीवः कुह कस्य शर्मन्।
2) अधः स्विदासीद३दुपरीस्विदा३सीत्।
3) त्रिपादस्यामृतं दिवि।
4) ग्रीष्म इध्मः शरद्धविः।
5) सप्तास्यासन् परिधयः।

**C) कस्यचिदेकस्य प्रश्नस्योत्तरं विधेयम्।　　　　　　　　1x10=10**

1) नासदीयसूक्ते ब्रह्माण्डस्य सृष्टिप्रक्रिया यथा प्रतिपादितास्ति सा वैशद्येनालोच्यताम्।
2) पुरुषसूक्तगतं पुरुषस्वरूपं सरहस्यं निर्णीयताम्।
3) ऋग्वेदे प्रतिपादितस्य दार्शनिकतत्त्वस्य विवेचनं किमपि अधीतसूक्तमाश्रित्य विधीयताम्।

**SK-331 – योगः**

कालावधिः - होरा　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन उत्तरत।**　　　　　　　　　　　　　　　　　　　　　　　　　　　　**1x5=5**

1) का नाम स्थितिः।
2) कः आगमः प्लवते।
3) सर्ववृत्तिनिरोधे कः समाधिः।
4) मिथ्याज्ञानस्य पञ्च पर्वाणि कानि।
5) ग्राह्याकारपूर्वा का।
6) क्लिष्टच्छिद्राणि कानि।
7) कदा पुरुषः चित्तवृत्त्यविशिष्टो भवति।

**B) समासेन विवृणुत।**　　　　　　　　　　　　　　　　　　　　　　　　　　　　　**3x5=15**

1) अभ्यासवैराग्याभ्यां तन्निरोधः, व्याख्यात।
2) निद्रावृत्तिं विवृणुत।
3) भाष्यदिशा अनुमानप्रमाणं निरूपयत।
4) वृत्तिसारूप्यमितरत्र, व्याख्यात।
5) विकल्पं प्रतिपादयत।
6) काः पञ्चचित्तभूमयः, तासु योगपक्षे काः सन्ति, काः न सन्ति।

**C) एकं विशदयत।**　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　**1x5=5**

1) स्मृतिं निरूपयत।

## SK-401 – अलंकारशास्त्रोपकण्ठम्

कालावधिः - होरा पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन उत्तरत।** **1x10=10**

1) रसः अनुमीयते इति कः अवदत्?
2) गुणाः कस्य धर्माः?
3) सर्वरससाधारणो गुणः कः?
4) जगन्नाथकृतं रसलक्षणं किम्?
5) को नाम संकेतः?
6) रसविषये अभिनवगुप्तस्य को वादः।
7) शक्यार्थो नाम कः?
8) कीदृशः स्थायिभावः रसः?
9) द्विविधाः विभावाः के?
10) अधमकाव्यस्य अपरं नाम किम्?
11) शान्तरसस्य स्थायिभावः कः?
12) अलंकारध्वनिकाव्यं नाम किम्?

**B) पञ्च विवृणुत।** **3x5=15**

1) रससूत्रं विवृणुत।
2) उत्तममध्यमकाव्ययोः स्वरूपं विवृणुत।
3) दशाननकिरीटेभ्यः इत्यादिश्लोकं सान्वयार्थं विवृणुत।
4) करुणरसस्य आनन्दमयत्वं निरूपयत।
5) अहो गोदावरीतीरे इत्यादिश्लोकस्य सान्वयार्थं व्याख्यात।
6) गौडीं रीतिं प्रतिपादयत।
7) रूपकालंकारं सलक्षणोदाहरणं प्रदर्शयत।

## SK-431 – संस्कृतसाहित्येतिहासः

कालावधिः - होरा　　　　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - 25

---

**A) अधोगतेषु यथेच्छं षट् प्रश्नान् समाधत्त।**　　　　　　　　　　　　　**1x6=6**

1) पाणिनिविरचितस्य काव्यत्रयस्य कानि नामानि।
2) कस्मिन् समये कस्मिन् शिलालेखे भारवेर्नाम लिखितमस्ति।
3) भट्टिकाव्यस्य नामान्तरं किं तत्र च कति सर्गा विद्यन्ते।
4) विज्जिकायाः प्रसिद्धं पद्यमेकमुदाह्रियताम्।
5) महिम्नः स्तोत्रं केन रचितं तत्र कस्य च महिमा वर्णितोऽस्ति।
6) कालिदासेन किन्नामानि रूपकाणि विरचितानि।
7) कस्य छन्दसः व्यवहारे भवभूतेः प्रसिद्धिरासीत्। तस्य छन्दसः कति अक्षराणि कुत्र च यतिः।
8) वेणीसंहारनामकरणे किं वीजम्।

**B) अधोस्थितेषु त्रयः प्रश्नाः संक्षेपेण समाधेयाः।**　　　　　　　　　　　　**3x3=9**

1) महाकाव्यानां विकाशः कथं सञ्जातः।
2) माघे सन्ति त्रयो गुणाः - एतस्याः उक्तेः याथार्थ्यं प्रतिपादयत।
3) मेघदूतस्य काव्यशैली कीदृशी परिलक्ष्यते।
4) मुद्राराक्षसस्य किंविधा विशिष्टता विद्यते।
5) संक्षिप्ता टीका कार्या (कस्यचिदेकस्य)-
6) बुद्धचरितम्, राजतरङ्गिणी, शूद्रकः।

**C) एकं प्रपञ्चयत।**　　　　　　　　　　　　　　　　　　　　　　**1x10=10**

1) भारवेर्भा रवेरिव इति वचनस्य तात्पर्यं किरातार्जुनीयमाश्रित्य प्रकाश्यताम्।
2) कालिदासरचितं महाकाव्यद्वयमवलम्ब्य विरच्यतां कश्चन नातिदीर्घः प्रबन्धः।

   दृश्यकाव्यानामुद्भवसम्बन्धि मतवैचित्र्यं समासेनालोच्यताम्।

RKMVERI/DSS/MAIS/16-21/D2017/UT-1/SK-444

**SK-444 – साहित्यदर्पणः**

कालावधिः - होरा पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन उत्तरत** **1x6=6**

1) प्राचीनमते गुणाः कति।
2) शब्दानामतत्परत्वे किं भवति।
3) भ्रमधार्मिक इत्यादौ अनुमानस्वरूपं कीदृशम्।
4) गुणाः कस्य उत्कर्षहेतवः।
5) मार्गाभेदस्य स्वरूपं किम्।
6) लक्षणायां प्रयोजनरूपार्थे लक्षणा कुतो न स्वीकार्या।
7) यावत्कार्यप्रसारिणी वृत्तिः का।
8) शब्दोच्चारणमात्रवेद्यः अर्थः कः।

**B) समासेन विवृणुत।** **3.5x4=14**

1) माधुर्यगुणं सलक्षणोदाहरणं प्रतिपादयत।
2) दीर्घदीर्घतरम् अभिधाव्यापारं खण्डयत।
3) जलकेलीत्यादौ व्यङ्ग्यः नानुमेयः, साधयत।
4) ओजोगुणं सलक्षणोदाहरणं निरूपयत।
5) भ्रमधार्मिक इत्यादौ हेतोः अनैकान्तिकत्वं प्रदर्शयत।
6) यत्परः शब्दः स शब्दार्थः इति वदतः तात्पर्यवृत्तिं निरस्यत।

**C) एकं प्रपञ्चयत।** **1x5=5**

1) वक्तृबोद्धव्यादिभेदात् वाच्यात् व्यङ्ग्यः भिन्नः ग्रन्थदिशा विशदयत।
2) प्राचीनोक्तानां शब्दगुणानामन्यत्र अन्तर्भावं साधयत।